International Journal of Sanskrit Research 2021; 7(1): 505-508

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 505-508
© 2021 IJSR
www.anantaajournal.com
Received: 26-10-2020
Accepted: 23-12-2020

**Dr. V Balaji**
Assistant Professor, Department of Sanskrit, Dwaraka Doss Goverdhan Doss Vaishnav College Arumbakkam, Chennai, Tamil Nadu, India

**Corresponding Author:**
**Dr. V Balaji**
Assistant Professor, Department of Sanskrit, Dwaraka Doss Goverdhan Doss Vaishnav College Arumbakkam, Chennai, Tamil Nadu, India

# अकर्मवश्यम् ब्रह्म

**Dr. V Balaji**

## सारांश

प्रपञ्चसृष्टिकाले एको हि परमात्मा सर्वेष्वपि प्राणिषु “अनेन जीवेन” इति मन्त्रोक्तरीत्या अनुप्रविश्य नामरूपव्याकरणं करोति इत्युक्तं, एवं प्रजापतिवाक्योदितगुणाः जीवब्रह्मणोः साम्यत्वेऽपि, एकस्मिन् शरीरे स्थितिप्राप्तयोः एकस्य सुखदुःखभोक्तृत्वम्, अन्यस्य तदनश्नत्वञ्च उच्यते मुण्डकोपनिषद्वाक्येन -

“द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योभिचाकशीति।। 1
समाने वृक्षे पुरुषो निमग्नः अनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः।।”21

**श्रुत्यर्थः -**

तत्र “युक्” शब्दः गुणपरः। युज्यते इति युक्, इति तस्य व्युत्पत्तिः। समानगुणकः सयुक् इत्यर्थः। अतः सयुजौ – समानगुणकौ अपहतपाप्मत्वादि गुणैः परस्परसमानौ, सखायौ – सहचरौ द्वौ, सुपर्णौ – पक्षिसदृशौ, समानं वृक्षं – एकं छेदनार्हं वृक्षवत्, नाशार्हशरीरं समाश्रितौ इत्यर्थः। तयोः मध्ये अन्यतरः जीवः स्वादु पिप्पलाख्यकर्मफलं भुङ्क्ते, अन्यस्तु परमात्मा अभुञ्जान एव प्रकाशते। अत्र शरीरतदाश्रयजीवपरादि विषयवाचकशब्दनिगरणेन विषयवाचकवृक्षसुपर्णादिशब्दैः वृक्षत्वाद्यध्यवसानलक्षणरूपातिशयोक्तिः विच्छित्तिविशेषाय इत्यर्थः। अतः एकस्मिन्नेव शरीरे स्थितेऽपि तस्य परमात्मनः न कर्मफलाश्नत्वं सङ्गच्छते।

**कूट शब्दः** अनेन जीवेन, एकस्य सुखदुःखभोक्तृत्वम्, “युक्”

## प्रस्तावना

एवं समाने वृक्षे इत्यत्र अनीशया इत्यस्य भोग्यभूतया प्रकृत्या इत्यर्थः। मुह्यमानः – “पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ” 12,“देहयोगाद्वा सोऽपि”2

---

1. मु 3.1.1
2. मु.3.1.2
1. ब्र.सू 3.1.4
2. ब्र.सू. 3.1.5
3. मु.3.1.1

इत्यत्रोक्तन्यायेन तिरोहितपरमात्मशेषत्वज्ञानानन्दलक्षणस्वरूपः सन् वृक्षवत् छेदनार्हे एकस्मिन् शरीरे जीवः " "स्थूलोऽहं" "कृशोऽहम्" इत्यादि तादात्म्यबुद्ध्या पांसूदकवत् तदेकतामापन्नः सन् तत्संसर्गकृतानि दुःखान्यनुभवति इत्यर्थः। एवं "जुष्टं यदा पश्यत्यन्यमीशं.......वीतशोकः" इत्यत्र "इति" शब्दः बुद्धिस्थप्रकारवचनः। "च" शब्दः अध्याहर्तव्यः, तथा च – यदाऽसौ जीवः निमग्नात् स्वस्मात् धारकत्वनियन्तृत्वशेषित्वादिना विलक्षणं स्वकर्मभिः प्रीतं परमात्मानम्, अखिलजगदीशनलक्षणमस्य महिमानं च यदा पश्यति, तदा वीतशोको भवतीत्यर्थः।।

अस्य मन्त्रस्य श्रुतप्रकाशिकायां प्रथमाध्यायस्य तृतीये पादे द्युभ्वाद्यधिकरणे स्थित्यदनाभ्याञ्च इत्यस्मिन् सूत्रे आचार्यैः एवं विचार्यते – ननु कथं "द्वा सुपर्णेति" मन्त्रस्य जीवपरमात्मपरत्वं वक्तुं शक्यते। पैङ्गिरहस्यब्राह्मणेऽस्य मन्त्रस्य तथा व्याख्यातत्वात्, तथा हि – "तयोरन्यः पिप्पलं स्वाद्वत्ति इति सत्वम्, अनश्नन्नन्योऽभिचाकशीति ज्ञः, तौ एतौ सत्वक्षेत्रज्ञौ" [3] इत्यत्र स्वाद्वत्तीत्येतस्य वाक्यस्य सत्वपरत्वं, अनश्नन्नित्यादेः क्षेत्रज्ञपरत्वञ्च प्रतीयते। न च सत्वक्षेत्रज्ञशब्दौ जीवपरमात्मपरौ इति वाच्यम्। तयोः शब्दयोः अन्तःकरणजीवपरतया प्रसिद्धत्वात्, "तदैतत् सत्वं येन स्वप्नं पश्यति अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञः तावेतौ सत्वक्षेत्रज्ञौ" इति सत्वक्षेत्रज्ञशब्दयोः अन्तःकरणजीवशब्दाभ्यां पैङ्गिश्रुत्यैव व्याख्यातत्वाच्च। येन पश्यतीति करणत्वप्रतीतेः सत्वं हि अन्तःकरणम्, स्वप्नद्रष्टृत्ववाच्यो क्षेत्रज्ञो जीवः, अतः अयं मन्त्रः अन्तःकरण जीव पर एव इति चेत् –

तदुच्यते – न तावत् जीवपरमात्मापरत्वमस्य मन्त्रस्य अपवदितुं शक्यते, अनेन मन्त्रेण तुल्यार्थतया प्रत्यभिज्ञायमाने "समाने वृक्षे पुरुषो निमग्नः" इत्यनन्तरे मन्त्रे जीवपरयोः प्रतिपन्नत्वात्। अस्य मन्त्रस्य तदैकार्थ्याच्च, "समानं वृक्षं परिषस्वजाते","समाने वृक्षे पुरुषो निमग्नः" इति तयोरैकार्थ्यं हि प्रतीयते। "समाने वृक्षे" इति मन्त्रे च पुरुषो जीवः, अन्तःकरणस्य पुरुषशब्दवाच्यत्वाभावात्, एवं "शोचति" "मुह्यमानः" "पश्यति" "वीतशोकः" इति पदानामस्वारस्यप्रसङ्गाच्च जीव एवोच्यते। अन्यश्च परमात्मा, ईशशब्दोक्तत्वात् स्वविषयकज्ञानेन वीतशोकत्वहेतुत्वाच्च नान्यत् वक्तुं शक्यते। न केवलं अनन्तरमन्त्रैकार्थ्यात् "द्वा सुपर्णेति" मन्त्रस्य जीवपरमात्मपरत्वं, किन्तु स्ववाक्ये "स्वाद्वत्ति" , "अनश्नन्नन्यः" इति भोक्तृत्वाभोक्तृत्वादि श्रवणाच्च तदवसीयते। एवं चक्षुश्श्रोत्रादीनां द्रष्टृत्वश्रोतृत्वादिवत् अन्तःकरणस्यापि करणत्वादेव भोक्तृत्वं न संभवति, जीवस्य च वृक्षशब्दोक्तदेहपरिष्वङ्गदशायामेव अनश्नत्वं नोपपद्यते। अतः "द्वा सुपर्णेति" मन्त्रः जीवपरमात्मपरमेव इति।

यद्येवमुच्यते- तर्हि पैङ्गश्रुतेः कोऽर्थः इति चेत्- तदुच्यते तत्र "सत्वम्" इति पदेन बद्धजीवः उच्यते। "द्रव्यासु व्यवसायेषु सत्वमस्त्री तु जन्तुषु"[1] [3] इति नामानुशासनात् जन्तुपरत्वावगतेः, जन्तुश्च चेतनः, "प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः"[2] इति नामपाठात्। "वन्यान् विनेष्यन्निव दुष्टसत्वान्"[3] इति प्रयोगात्, "न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः।।" [4] इति दर्शनात् क्षेत्रज्ञशब्दो परमात्मपरः, अर्थान्तरप्रसिद्धाकाशप्राणादिशब्दवत् अर्थानुपपत्या परमात्मपरत्वोपपत्तेः। "विष्णोर्नामसहस्रं मे" इत्युपक्रम्य "क्षेत्रज्ञोऽक्षर एव च" इति परमात्मनि प्रयोगात्। एवं क्षेत्रं जानातीति अवयवार्थस्य तस्मिन्नेव पुष्कलत्वात् परमात्मा एव इति।।

**एवं मोक्षधर्मे च –**

"ततस्त्रैगुण्यहीनास्ते परमात्मानमञ्जसा।
प्रविशन्ति द्विजश्रेष्ठ क्षेत्रज्ञं निर्गुणात्मकम्।।
सर्वावासं वासुदेवं क्षेत्रज्ञं विद्धि तत्वतः।।
विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः।
एकश्चरति क्षेत्रेषु स्वैरचारी यथासुखम्।।
क्षेत्राणि च शरीराणि ज्ञानानि च शुभाशुभे।
तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते।।" [14]

इत्यादि प्रयोगात् क्षेत्रज्ञशब्दवाच्यः परमात्मा इति।

एवं तत्रैव कपिलासुरिसंवादे च – "ज्ञानानामासुरे क्षेत्रे क्षेत्रज्ञो द्रष्टा शुचिरुपेक्षकः, ज्ञातृको बुद्ध्यमानाप्रतिबुद्धयोः परममृतं विदित्वा निरवयवमनामयमस्माद् दुःखात्

1. निघण्टुः
2. निघण्टुः
3. रघु 2.8
4. भ.गी.18.40
1. म.भा.मो.354.18

विमुच्यत एव" इति बुद्धयमानाप्रतिबुद्धशब्दाभिहितयोः चिदचितोः परस्य क्षेत्रज्ञशब्देनाभिधानात्, क्षेत्रज्ञशब्दवाच्यं परब्रह्म इति। एवञ्च तत्रैव पञ्चविंशतितत्वानि वर्गशब्देनोक्त्वा, "एतस्माद्वर्गादपवृत्तोऽपवर्गदः क्षेत्रज्ञः शुचिरुपेक्षको बुद्ध्यामानाप्रतिबुद्ध्ययोः परस्तात्" इति उक्तत्वाच्च।।

एवं "अन्यदुदकमन्यत् पुष्करपर्णम्, तथाऽन्यत् क्षेत्रम् अन्यः पुरुषः पञ्चविंशकः अन्यश्चास्मात् क्षेत्रज्ञः"[1] इति, पुनश्च तत्रैव – "एवमासुरे ! अन्यद्द्रव्यमन्यः पुरुषः पञ्चविंशतितत्वम् अन्योऽस्मात् क्षेत्रज्ञः"[2] इति पञ्चविंशात् परस्मिन् क्षेत्रज्ञशब्दप्रयोगात् सैव परमात्मा इति परामृश्यते । एवं सनत्कुमारनारदसंवादे च –

"पश्यः पश्यति पश्यन्तमपश्यन्तं च पश्यति ।
पश्यन्तं पश्यपश्यत्वात् पश्यापश्यो न पश्यतः ।।"[3]

{अस्यार्थः– पश्यः – परमात्मा, पश्यन्तं – चेतनम्, अपश्यन्तं – अचेतनम्, पश्यन्तं – परमात्मानं, पश्यापश्ये – चेतनाचेतनश्च, पश्यपश्यत्वात् – परमात्मदृश्यतैकस्वरूपत्वान्न पश्यत इत्यर्थः }

इति श्लोकमुक्त्वा, "प्रकृतिं क्षेत्रं क्षेत्रज्ञं च अपरः क्षेत्रज्ञः षड्विंशकोऽनुपश्यति, न तु पञ्चविंशकः क्षेत्रज्ञः प्रकृतिर्वा परं क्षेत्रज्ञं पश्यति"**4** इति प्रयोगात्। अत्र हि आत्मशब्दवत् क्षेत्रज्ञशब्दस्य जीवपरसाधारणस्य पञ्चविंशकविशेषितस्य जीवपरमात्मविषयत्वदर्शनाच्च तावेव प्रतिपद्यते। एवं "येन स्वप्नं पश्यति" इत्यत्र येन इति इत्थंभावे तृतीया। येन विशिष्टः परमात्मा स्वप्नं पश्यतीत्युच्यते। ततश्च काठिन्यवान् यो बिभर्ति इति पृथिवीद्वारा काठिन्यवत् स्वप्नद्रष्टृत्वं जीवद्वारा परमात्मविशेषणं भवतीति न विरोधः। शारीरशब्दश्च "तस्यैष एव शारीर आत्मा"**5** इतिवत् अत्रैव स्वव्यतिरिक्तसमस्तचिदचिच्छरीरके परमात्मन्युपपद्यते। उपद्रष्टा इति निरूपाधिकद्रष्टृत्वं च तस्यैवोपपद्यते। एवं शारीर उपद्रष्टेति पदद्वयेन परस्य क्षेत्रज्ञशब्दवाच्यत्वमुपपादितं भवति। अतः द्वा सुपर्णेति मन्त्रः जीवपरमात्मपरः इति।

किञ्च "इयदामननात्"[16] इति अक्षरध्यधिकरणसूत्रे – द्वा सुपर्णेति इति मन्त्रे भोक्त्रभोक्त्रोः प्रतिपाद्यता, "ऋतं पिबन्तौ" इत्यत्र तु भोक्त्रोरेव प्रतिपाद्यता, पिबन्तौ इति श्रवणात्। तत्र छत्रिन्यायेन पिबदपिबत्समुदायलक्षकं पिबन्तौ इत्यनेन वक्तुं शक्यते, अत्र मुख्यार्थपरित्यागे कारणाभावादिति पूर्वपक्षं कृत्वा, "ऋतं पिबन्तौ", "द्वा सुपर्णा" इत्यत्र च द्वित्वसंख्याप्रतीतेरैक्यं प्रतीयते। तत्र च "द्वा सुपर्णेति" मन्त्रे "तयोरन्यः पिप्पलं स्वादुवत्यनश्नन्नन्यः" इति अशनायाद्यतीतः परमात्मा प्रतीयते। अत एव "जुष्टं यदा पश्यत्यन्यमीशम्" इति वाक्यशेषे परमात्मनः एव प्रतिपादनं दृश्यते। "ऋतं पिबन्तौ" इति मन्त्रे च "अन्यत्र धर्मात्" इत्युपक्रमेण परमात्मनः प्रकृतत्वात्, "यः सेतुरीजानानामक्षरं ब्रह्म यत् परम्" इति परमात्मविषयवाक्यशेषाच्च परमात्मैव प्रतिपाद्यते। अतः "ऋतं पिबन्तौ" इत्येतत् छत्रिन्यायेन योज्यं भवति। अतः वेद्यभेदात् विद्याऽभेदः इति तत्रैव प्रतिपाद्यमानत्वात् तयोः मन्त्रयोः भिन्नार्थत्वप्रतीतिः नास्ति। तस्मात् "द्वा सुपर्णेति" मन्त्रः जीवपरमात्मपर एव, सत्वक्षेत्रज्ञशब्दौ अपि तत्परौ एव इति सिद्धम्। अतः एकस्मिन् शरीरे विद्यमानयोः अन्यतरस्य परस्य कर्माश्लिष्टत्वं सिद्ध्यति, अतः अकर्मवश्यः परमात्मा इति। एवं सारावल्यामपि निगमान्तमहादेशिकै इत्थं निगद्यते –

हेयं वस्तु स्वतो यत् स्थितिरिह हि भवेद् दुःखकृत्स्वेच्छयापि
त्याज्यत्वं नान्यथा स्यादिति न निरुपधेर्हेयभावास्य हानेः।
नित्यस्वातन्त्र्यभाजो भविन इव दशाभेदतो नाप्यवद्यं
श्रुत्यैवैकत्र देहे परतदितरयोश्शुद्ध्यशुद्धी ह्यधीते।।[2]

**अस्यार्थः –**

यद्वस्तु स्वतो हेयं स्वरूपेण त्याज्यं निन्द्यञ्च भवति, तस्मिन् वस्तुनि परनियोजनेन वा स्वेच्छयैव वा अवस्थानं दुःखप्रदं भवेदिति सर्वलोकसिद्धो विषयः। तत्रावस्थानस्य स्वेच्छाकृतस्य दुःखकृत्त्वभावे तस्य हेयत्वमेव भवेत्। यथा

1. उप.भा.
2. तत्रैव
3. सनत्कुमार-नारदसंवादः
4. उप.भा.
5. तै.आ.2

1. ब्र.सू.3.3.34
2. अधि.सा.305

पूयशोणितादिमज्जनं राजकिङ्करस्य हेयं, तथा राज्ञोऽपि तद्धेयमेव, तथा च ईश्वरस्यापि जीववत् देहावस्थानं दुःखकारणमेव स्यादिति चेत्, तन्न निरुपधेर्हेयभावस्य हानेः – निरुपाधिकहेयत्वस्य कस्मिन्नपि वस्तुन्यभावात्। तच्चोक्तं पराशरेण –

तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते।
तदेव कोपाय यतः प्रसादाय च जायते।।
तस्माद्दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम्।। [17]

इति वचनन्यायेन लोके वस्तुषूपलभ्यमानस्याल्पानुकूल्यस्य प्रातिकूल्यस्य च कर्मोपाधिमूलकत्वात् ईश्वरे तदभावात् न तस्य देहसम्बन्धमात्रेण दुःखसम्भव इति भावः। स्वशासित्रन्तरशून्यत्वेन कदाचिदपि पारतन्त्र्यशून्यस्य परमात्मनः कर्मफलानुभवहेतुभूतपारतन्त्र्यसापराधत्वरूपस्वरूपयोग्यता सहकारि- शून्यस्य संसारिणो जीवस्येव, अवस्थाभेदेनापि सुखदुःखानुभवहेतुभूतकर्मसम्बन्धो न भवति। यथा जीवस्य मुक्तिदशायां कर्मसम्बन्धशून्यत्वेऽपि बन्धदशायां कर्मसम्बन्धोऽस्ति तथा अवस्थाभेदेनापीश्वरस्य न कर्मसंबन्धप्रयुक्तदोषादयः प्रसज्यन्ते। नित्यस्वातन्त्र्यत्वेन कदाचिदपि योग्यताद्वयशून्यत्वादित्यर्थः, एकस्मिन् शरीरे वर्तमानयोः जीवात्मपरमात्मनोः कर्मफलाननुभवसिद्धनिरतिशयदीप्तियोगः कर्मफलानुभवरूपे शुद्ध्यशुद्धी च वर्तते, तदप्यत्र द्वा सुपर्णा इति मन्त्रेण स्पष्टतया प्रतिपादितः, अतः देहान्तस्स्थितिमात्रेण नेश्वरस्य कर्ममूलकसुखदुःखानुभवः, अतः अकर्मवश्यः परमात्मा इति स्थितम्।

**संदर्भ**


1. श्रीमद्भगवद्रामानुजविरचितब्रह्मसूत्रश्रीभाष्यम् सुदर्शनसूरिप्रणीतश्रुतप्रकाशिकाव्याख्योपेतम् श्रीमद्रङ्गरामानुजमुन्युपज्ञभावप्रकाशिकाव्याख्योपेतम् च
2. श्री नृसिंहप्रिया ट्रस्ट्, चेन्नै, 2006. श्रीमद्भगवद्गीता श्रीमद्भगवद्रामानुजविरचितभाष्येण श्रीकवितार्किकसिंहसर्वतन्त्रस्वतन्त्र-श्रीमद्वेदान्तदेशिकविरचितया तात्पर्यचन्द्रिकया, श्रीमदभिनवदेशिक-वीरराघवार्यमहादेशिकयविरचित-विशेषभूमिका-टिप्पणेन च समेता Sri Uttamur Viraraghavachariar Centenary Trust, Chennai, 2004.
3. उपनिषद्भाष्यम् श्रीरङ्गरामानुजमुनिप्रभृति विरचित केनाद्युपनिषदुपेतम् श्रीमदभिनवदेशिक-वीरराघवार्यमहादेशिकविरचित-परिष्कर-उपनिषदर्थकारिका सहितम् Sri Uttamur Viraraghavachariar Centenary Trust, Chennai, 2003.
4. सिद्धान्तसंरक्षणम् प्रकाशिका, श्रीवैष्णवसभा, बैङ्गळूरु 560021, 2000.
5. श्रीमन्निगमान्तमहादेशिकानुगृहीता अधिकरणसारावलिः कुमारवेदान्ताचार्यानुगृहीतेन चिन्तामणिना समेता च श्रीवणशठकोपश्रीलक्ष्मीनृसिंहशठकोपयतीन्द्रमहादेशिक दिव्यनियमनानुसारेण कुरुच्चि. लक्ष्मीनृसिंहाचार्येण प्रकाशिता, 1940.
6. श्रीभगवद्रामानुजविरचित-गीताभाष्यम् सम्पादकौ श्रीमुष्णं,पुराणं,वङ्गीपुरम्,न्यायशिरोमणिः डा.व. सौम्यनारायणः, मेल्मा.डा.ल. सम्पत्कुमाराचार्यः, श्रीरङ्गं श्रीमदाण्डवनाश्रमः, चेन्नै, 2017.
7. श्रीकपिस्थलंदेशिकाचार्यैः अनुगृहीता अधिकरणरत्नमाला पुदुक्कोट्टै श्रीनिवासराघवेण परिशोधिता ग्रन्थकर्तृभिः प्रत्यवेक्षिता च पुदुक्कोट्टै यन्त्रालये मुद्रयित्वा प्रकाशिता, 1938.


1. वि.पु. 2.6.46/48